| क्रमांक संख्या | के. मा. शि. बो. परीक्षा आधारित प्रश्न-कोष<br>संस्कृत (केन्द्रिक) , कूट सं. 322 | |
|---|---|---|
| 1.(i) | **10 अङ्काः**<br>**खण्ड-(क)**<br>**अपठितांश अवबोधन**<br>**Unseen Reading Comprehension**<br><br>अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।<br>निम्नलिखित गद्यांश को पढ़कर दिये गए प्रश्नों के उत्तर संस्कृत में लिखिए।<br>Read the following passage and answer the given questions in Sanskrit.<br><br>सेवा अस्माकं परमधर्मः। सेवायाः अयम् एव अभिप्रायः यत् मानवः परस्परं सम्यग् रूपेण साहाय्यं कुर्यात्। सर्वो हि विविधरूपेण सक्षमः। स्वक्षमतया परेभ्यः सहयोग-प्रदानेन हि जीवनस्य सार्थक्यं भवति। सेवा द्विविधा भवति – पारमार्थिकी लौकिकी च। पारमार्थिक-सेवया महात्मानः जनेभ्यः ज्ञानं यच्छन्ति। ते तेषां दोषनिवारणार्थं पारस्परिकं वैमनस्यं च दूरीकर्तुं प्रयतन्ते। सांसारिकसम्बन्धेषु लौकिकसेवाया अपि महत्त्वम् विद्यते। एकस्य असहायस्य सेवा लौकिकी सेवा भवति। अनया समाजे शोभनाः सम्बन्धाः जायन्ते। जनानां समस्यानां समाधानम् अपि भवति। जनाः सदैव एतदेव चिन्तयन्तु – यद् यावद् वयं स्वस्थाः सक्षमाः तावद् अस्माकं परमं कर्तव्यं सामाजिक सेवा भवेदिति। वस्तुतः अयमेव मानवीयधर्मः।<br><br>**प्रश्नाः**<br><br>(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)<br>एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in one word : (Only two questions) *2×1=2*<br>(i) मानवः परस्परं सम्यक् किं कुर्यात् ?<br>(ii) महात्मानः जनेभ्यः किं यच्छन्ति ?<br>(iii) लौकिकी सेवया समाजे कीदृशाः सम्बन्धाः जायन्ते ?<br><br>(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)<br>पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in a complete sentence : (Only two questions) *2×2=4*<br>(i) सेवायाः कः अभिप्रायः ?<br>(ii) कस्य सेवा लौकिकी सेवा भवति ?<br>(iii) जनाः सदैव किं चिन्तयन्तु ?<br><br>(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत।<br>इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए।<br>Write a suitable title for this passage in two or three words. *1×1=1* | मुख्य परीक्षा 2025 |

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)

Answer as directed : (Only three questions) $3\times1=3$

(i) 'वैमनस्यं' इति पदस्य विशेषणपदं चिनुत :

(A) पारस्परिकम्

(B) सार्थक्यम्

(C) वयम्

(D) अस्माकम्

(ii) पारमार्थिक-सेवया महात्मान: जनेभ्य: ज्ञानं यच्छन्ति । अत्र 'महात्मान:' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(A) पारमार्थिक-सेवया

(B) यच्छन्ति

(C) जनेभ्य:

(D) ज्ञानम्

(iii) 'अक्षम:' इति पदस्य विलोमपदं चिनुत :

(A) स्वस्थ:

(B) सार्थक्यम्

(C) साहाय्यम्

(D) सक्षम:

(iv) 'ते तेषां दोषनिवारणार्थं प्रयतन्ते' अत्र वाक्ये 'ते' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

(A) 'जनेभ्य:'

(B) 'महात्मान:' इति कृते

(C) 'सेवाया:' इति कृते

(D) मानवेभ्य:

---

**उत्तराणि -**

(अ)

(i) साहाय्यम्

(ii) ज्ञानम्

(iii) शोभना:

(आ)

(i) सेवाया: अयम् एव अभिप्राय: यत् मानव: परस्परं सम्यग् रूपेण साहाय्यं कुर्यात् ।

(ii) एकस्य असहायस्य सेवा लौकिकी सेवा भवति ।

(iii) जना: सदैव एतदेव चिन्तयन्तु यद् यावद् वयं स्वस्था: सक्षमा: तावद् अस्माकं परमं कर्तव्यं सामाजिक सेवा भवेदिति ।

(इ) मानवसेवा/असहाय-सेवा/सेवाधर्म: – परमधर्मः/मानवीयधर्मः/सेवा परमो धर्मः / सेवा अस्माकं परमधर्मः

(ई)

(i) (A) पारस्परिकम्

(ii) (B) यच्छन्ति

(iii) (D) सक्षम:

(iv) (B) 'महात्मान': इति कृते

| | | |
|---|---|---|
| (ii) | **खण्ड: 'क'**<br>**अपठितांश-अवबोधनम्** ***10 अङ्का:***<br>**Unseen Reading Comprehension**<br><br>अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।<br>निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।<br>Read the following passage and answer the given questions in Sanskrit.<br><br>एकत्वभावनया यत् कार्यं क्रियते तद् 'एकता' इति कथ्यते। एकतया मानव: बलवान् भवति। एकतया समाज:, राष्ट्रं, जगत् च उन्नतिपथम् अधिरोहति। अद्यत्वे तु राष्ट्रे एकताया: अतीवावश्यकता अस्ति। यस्मिन् देशे एकताया अभावो विद्यते, स: देश: स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति। अस्माकम् अपि देश: एकताया: अभावात् चिरं परतन्त्र: आसीत् परं यदा भारते एकत्वभावना समुत्पन्ना तदा भारतं स्वातन्त्र्यम् अलभत। एकताया: प्रभाव: जडवस्तुषु अपि दृश्यते। जलबिन्दव: सम्मिल्य नदीरूपं धारयन्ति। क्षुद्रतन्तव: अपि सम्मिल्य यदा रज्जुरूपं धारयन्ति, तदा ते बलशालिनं गजम् अपि नियन्त्रयितुं समर्था: भवन्ति। यदा अस्माकं विचारा:, व्यवहारा:, चिन्तनं, भाषणं सङ्कल्पश्च एकत्वभावनया परिपूर्णा: भवन्ति, तदा न किमपि असाध्यं भवति। संसारस्य प्राचीनतमे ग्रन्थे ऋग्वेदे अयमेव सन्देश: – "संगच्छध्वं संवदध्वम् सं वो मनांसि जानताम्" इति मन्त्रेण मानवकल्याणाय प्रदत्त:।<br><br>**प्रश्ना:**<br><br>(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)<br>एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in one word : (Only two questions) *2×1=2*<br>(i) मानव: कया बलवान् भवति ?<br>(ii) क्षुद्रतन्तव: सम्मिल्य किं रूपं धारयन्ति ?<br>(iii) अद्यत्वे राष्ट्रे कस्या: अतीवावश्यकता अस्ति ?<br><br>(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)<br>पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in a complete sentence : (Only two questions) *2×2=4*<br>(i) एकतया किं किम् उन्नतिपथम् अधिरोहति ?<br>(ii) यस्मिन् देशे एकताया अभावो विद्यते तत्र किं भवति ?<br>(iii) कदा किमपि असाध्यं न भवति ? | पूरक परीक्षा 2025 |

(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत।
इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए।
Write a suitable title for this passage in two or three words. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)
निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)
Answer as directed : (Only three questions) *3×1=3*

(i) "तदा ते बलशालिनं गजमपि नियन्त्रयितुं समर्था: भवन्ति"
इति वाक्ये 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(A) बलशालिने (B) गजाय

(C) क्षुद्रतन्तुभ्य: (D) रज्जुरूपाय

(ii) 'जलबिन्दव:' इति कर्तृपदस्य क्रियापदं किम् ?

(A) कथ्यते

(B) धारयन्ति

(C) शक्नोति

(D) भवन्ति

(iii) 'स्वतंत्र:' इति पदस्य विलोमपदमत्र किं प्रयुक्तम् ?

(A) अद्यत्वे

(B) मानव:

(C) परतन्त्र:

(D) जन्तव:

(iv) 'गजम्' इति पदस्य विशेषणपदं किम् ?

(A) असाध्यम्

(B) बलशालिनम्

(C) चिरम्

(D) स्वातन्त्र्यम्

**उत्तराणि -**

(अ) (i) एकतया (ii) रज्जुरूपम्

(iii) एकतायाः ।

(आ) (i) एकतया समाजः, राष्ट्रं जगच्च उन्नतिपथम् अधिरोहति ।

(ii) यस्मिन् देशे एकताया अभावो विद्यते सः देशः स्वकीयां स्वतन्त्रतां रक्षितुं नैव शक्नोति ।

(iii) यदा अस्माकं विचाराः, व्यवहाराः, चिन्तनं, भाषणं सङ्कल्पश्च एकत्वभावनया परिपूर्णाः भवन्ति, तदा न किमपि असाध्यं भवति ।

(इ) संघेशक्तिः कलौ युगे / संगच्छध्वं संवदध्वम्

(ई) (i) (ग) क्षुद्रतन्तुभ्यः/क्षुद्रतन्तवः इतिकृते

(ii) (ख) धारयन्ति ।

(iii) (ग) परतन्त्रः

(iv) बलशालिनम ।

| | | |
|---|---|---|
| 2(i) | **खण्ड: 'ख'**<br>**रचनात्मक-कार्यम्** **15 अङ्का:**<br><br>भवती श्रुति: । भवत्सखी मुंबई नगरे वसति । भवत्या: विद्यालये एका पर्यावरणगोष्ठी सञ्जाता । गोष्ठीं वर्णयन्ती श्रुति: स्वसखीं मीनाक्षीं प्रति पत्रं लिखति । अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषापदै: पूरयित्वा पत्रं पुन: लिखत ।<br>आप श्रुति हैं । आपकी सखी मुंबई नगर में रहती है । आपके विद्यालय में एक पर्यावरण गोष्ठी हुई थी । गोष्ठी का वर्णन करते हुए आप अपनी सखी मीनाक्षी को पत्र लिख रही हैं । इस पत्र में दिए गए रिक्त स्थानों को मञ्जूषा के पदों की सहायता से पूर्ण कर पत्र को पुन: लिखिए ।<br>You are Shruti. Your friend live in Mumbai. A seminar on environment was organised in your school. Describing the seminar Shruti wrote a letter to Meenakshi. Fill in the blanks in the letter from the words given in the box and rewrite the same. $10\times\frac{1}{2}=5$<br><br>**पत्रम्**<br><br>दिल्लीत:<br>दिनाङ्क: ________<br><br>प्रियसखि (i) ________ !<br>सप्रेम (ii) ________ !<br>गतसप्ताहे अस्माकं विद्यालये पर्यावरणविषये एका पर्यावरणगोष्ठी सम्पन्ना । तस्यां महानगरेषु प्रवर्धमानं (iii) __________ दृष्ट्वा (iv) __________ रक्षणाय तस्य उपायानां विषये (v) ________ स्वविचारा: प्रकटिता: । ते अकथयन् यत् पारिवारिकै: (vi) _______ रथ्यासु अवकर: न क्षेप्तव्य: । जलप्रदूषणं दूरीकर्तुं नगरपालिकाया: (vii) __________ सूचनीया: । जनानां प्रबोधनाय यथास्थानं 'जलमेव जीवनं' 'वृक्षा: रक्षणीया:' इत्यादिका: लेखपट्टिका: स्थापयितव्या: । वाटिकासु, उद्यानेषु विद्यालयेषु च वृक्षा: (viii) __________ । ध्वनिप्रसारक-यन्त्राणां प्रयोग: यथाशक्यं न विधातव्य: ।<br>अस्मिन् विषये भवद्विद्यालये यदि एतादृशी गोष्ठी भवेत् तर्हि (ix) ___________ ।<br>पितृभ्यां नम: ।<br>भवत्या: सखी<br>(x) ___________ ।<br><br>**मञ्जूषा**<br><br>नमस्ते, मीनाक्षि !, प्रदूषणं, वैज्ञानिकै:, श्रुति:, पर्यावरणस्य, सदस्यै:, रोपणीया:, अधिकारिण:, सूचयितव्या । | मुख्य परीक्षा 2025 |

**उत्तराणि -**

(i) मीनाक्षि !

(ii) नमस्ते

(iii) प्रदूषणं

(iv) पर्यावरणस्य

(v) वैज्ञानिकै:

(vi) सदस्यै:

(vii) अधिकारिण:

(viii) रोपणीया:

(ix) सूचयितव्या

(x) श्रुति:

| | | |
|---|---|---|
| (ii) | **खण्ड: 'ख'**<br>**रचनात्मकं-कार्यम्** ***15 अङ्का:***<br>**Writing Skills**<br>भवान् आलोक: दिल्ली-छात्रावासे वसति। स्वविद्यालयस्य वार्षिकोत्सवस्य वर्णनं कुर्वता मित्रं सौरभं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषा-प्रदत्तशब्दानां सहायतया पूरयित्वा पत्रं पुन: लिखत।<br>आप आलोक दिल्ली छात्रावास में रहते हैं। अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए मित्र सौरभ को लिखे पत्र में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थान भरकर पत्र को पुन: लिखिए।<br>You are Aalok, you live in Delhi Hostel. Describing annual day of your school, write a letter to your friend Saurabh and rewrite it with the help of the words given in the box. $10\times\frac{1}{2}=5$<br>**पत्रम्**<br>दिल्ली छात्रावासत:<br>दिनाङ्क: _______<br>प्रियमित्र (i) _______ !<br>सादरं (ii) _______ ।<br>ह्य: तव पत्रम् अधिगतम्। अत्र विशिष्ट: समाचार: अयमेव अस्ति यत् गतसप्ताहे (iii) _________ विद्यालयस्य (iv) _________ सम्पन्न: जात:। वयं छात्रा: सर्वे अध्यापका: च अस्मिन् कार्यक्रमे (v) _________ आसन्। कार्यक्रमस्य मुख्यातिथि: (vi) _______ आसीत्। स: अस्माकं सांस्कृतिक-कार्यक्रमस्य (vii) _______ अकरोत्। स: (viii) _________ छात्रेभ्य: पुरस्कारान् अपि अयच्छत्। अहमपि पुरस्कारम् लब्धवान्। पितृभ्यां सादरं (ix) __________ ।<br>भवत: अभिन्नमित्रम्<br>(x) ____________ ।<br>**मञ्जूषा**<br>अस्माकम्, नमस्ते, आलोक:, योग्येभ्य:, शिक्षानिदेशक:, प्रणामा:, व्यस्ता:, वार्षिकोत्सव:, सौरभ !, प्रशंसाम्। | पूरक परीक्षा 2025 |

**<u>उत्तराणि -</u>**

पत्रम्

(i) सौरभ !

(ii) नमस्ते

(iii) अस्माकम्

(iv) वार्षिकोत्सवः

(v) व्यस्ताः

(vi) शिक्षानिदेशकः

(vii) प्रशंसाम्

(viii) योग्येभ्यः

(ix) प्रणामाः

(x) आलोकः

| | | |
|---|---|---|
| 3.(i) | मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखित-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।<br>मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।<br>Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$<br><br>कस्मिंश्चिद् ग्रामे कश्चन (i) __________ वृद्धः आम्रवृक्षस्य आरोपणं करोति स्म। तदैव (ii) __________ आगत: कश्चन युवा तं वृद्धम् दृष्ट्वा (iii) __________ "भो वृद्ध! आम्रवृक्षा: तु प्राय: द्वादशवर्षानन्तरं (iv) __________। तव अवस्थां (v) ________ तु प्रतीयते यत् यदा अयं वृक्ष: (vi) ________ दास्यति, तदा त्वं जीवित: न (vii) ___________। अत: वृथा (viii) __________? एतत् निशम्य वृद्ध: तत्र फलयुक्तान् वृक्षान् दर्शयित्वा (ix) ________ "यथा मया अन्यै: आरोपितानां वृक्षाणां फलानि खादितानि, एवमेव अन्येऽपि मया आरोपितानां वृक्षाणां फलानि खादिष्यन्ति – इति (x) _________ एव अहम् आम्रवृक्षम् आरोपयामि।<br><br>**मञ्जूषा**<br><br>अकथयत्, विचार्य, अशीतिवर्षीय:, नगराद्, दृष्ट्वा, परिश्रमेण, भविष्यसि, फलन्ति, फलानि, अपृच्छत्।<br><br>**अथवा (OR)**<br><br>अधोलिखित-संवादे रिक्तस्थानानि मञ्जूषाप्रदत्त-वाक्यै: पूरयत :<br>निम्नलिखित संवाद में रिक्त स्थान मंजूषा में दिए गए वाक्यों से भरिए :<br>Fill in the blanks in the following conversation with the help of given sentences in box : $5\times1=5$<br><br>*अनिल:* — भो अजय! किं त्वं जानासि यत् गान्धिमहोदयानां जन्मदिवस: कदा भवति?<br>*अजय:* — मित्र अनिल! (i) ___________________।<br>*अनिल:* — आम्! अक्टूबर-मासस्य द्वितीये दिवसे तु अस्माकं पूर्वप्रधानमन्त्रिण: अपि जन्मदिवस: भवति। जानासि तस्य नाम किम्?<br>*अजय:* — आम् (ii) ___________________।<br>*अनिल:* — शोभनम्। सत्यमुक्तम्। स: लालबहादुर: शास्त्री तु सौम्यप्रकृति:, राष्ट्रभक्त: परिश्रमी च आसीत्। अस्मिन् दिने कीदृग्-वस्त्राणां मूल्यं न्यूनं भवति?<br>*अजय:* — जानामि। (iii) ___________________।<br>*अनिल:* — शोभनम् – खादीवस्त्राणां निर्माणं तु कुटीरोद्योगे भवति। खादीवस्त्र-निर्माणाय प्रमुखं यन्त्रं किमासीत्? | मुख्य परीक्षा 2025 |

| | |
|---|---|
| *अजय:* | — मित्र ! (iv) ____________________ । |
| *अनिल:* | — शोभनम् । चरखा-यन्त्रं तु स्वतन्त्रतान्दोलनेऽपि प्रमुखं साधनमासीत् । खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण के कुर्वन्ति ? |
| *अजय:* | — (v) ____________________ । |
| *अनिल:* | — शोभनम् । नेतारस्तु खादीवस्त्रेषु शोभना: दृश्यन्ते । शोभना खल्वेषा वेशभूषा । अत: सर्वै: जनै: अपि खादीवस्त्राणाम् उपयोग: करणीय: । |

**मञ्जूषा**

चरखा यन्त्रम् आसीत् ।
जाने, श्री लालबहादुर: शास्त्री ।
खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण नेतार: कुर्वन्ति ।
गान्धीमहोदयानां जन्मदिवस: अक्टूबर-मासस्य द्वितीये दिवसे भवति ।
अस्मिन् दिने खादीवस्त्राणां मूल्यं न्यूनं भवति ।

**उत्तराणि -**

(क)

(i) अशीतिवर्षीयः
(ii) नगराद्
(iii) अपृच्छत्
(iv) फलन्ति
(v) दृष्ट्वा
(vi) फलानि
(vii) भविष्यसि
(viii) परिश्रमेण
(ix) अकथयत्
(x) विचार्य

## अथवा

(ख) (i) गान्धिमहोदयानां जन्मदिवस मासस्य-अक्टूबर :द्वितीये दिवसे भवति
(ii) जाने, श्री लालबहादुर: शास्त्री ।
(iii) अस्मिन् दिने खादीवस्त्राणां मूल्यं न्यूनं भवति ।
(iv) चरखायन्त्रम् आसीत् ।
(v) खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण नेतार: कुर्वन्ति ।

| | | |
|---|---|---|
| (ii) | मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखित-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।<br>मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।<br>Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$<br><br>एकदा पाटलिपुत्रे (i) ___________ कुर्वत: भगवतो (ii) ___________ पार्श्वे एका वृद्धा (iii) _____________ समागता । (iv) ____________ पुत्र: सर्पदंशकारणात् (v) _____________ आसीत् । सा स्वपुत्रं पुन: (vi) _____________ भगवन्तं बुद्धं प्रार्थितवती । बुद्ध: तस्यै शाश्वतं (vii) _____________ उपदिशन् अकथयत् – यत् प्रत्येकं (viii) _____________ इह मृत्यु: (ix) _____________ एव भवति । अत एव अयं लोक: (x) __________ कथ्यते।<br><br>**मञ्जूषा**<br><br>बुद्धस्य, महिला, धर्म-प्रचारम्, मृत:, तस्या:, उज्जीवयितुं, सत्यम्, मृत्युलोक:, जातस्य, निश्चित:।<br><br>**अथवा (OR)**<br><br>अधोलिखित-संवादे रिक्तस्थानानि मञ्जूषाप्रदत्त-वाक्यै: पूरयत :<br>निम्नलिखित संवाद में रिक्त स्थान मञ्जूषा में दिए गए वाक्यों से भरिए :<br>Fill in the blanks in the following conversation with the help of given sentences in box : $5\times1=5$<br><br>*आचार्या* — भो उमे ! जानासि किं यद् अस्माकं देशस्य पूर्वं नाम किम् आसीत् ?<br>*उमा* — महोदय ! (i) ___________________ ।<br>*आचार्या* — शोभनम् । आर्यावर्तस्य अर्थोऽस्ति-आर्याणां स्थानम् । अत्र आर्यशब्दस्य कोऽर्थ: ?<br>*उमा* — महोदय ! (ii) ___________________ ।<br>*आचार्या* — शोभनम्, उमे ! अत्र सर्वे एव जना: श्रेष्ठा: आसन् । वद, 'भारतम्' नाम कस्य नाम्ना जातम् ?<br>*उमा* — महोदय ! (iii) ___________________ ।<br>*आचार्या* — शोभनम् । ऋषभदेवस्य पुत्र: चक्रवर्ती राजा भरत: आसीत् । तस्य नाम्ना एव भारतम् इति जातम् । एकोऽपर: भरत: कस्य पुत्र: आसीत् ?<br>*उमा* — महोदय ! (iv) ____________________ । | पूरक परीक्षा 2025 |

*आचार्या* — शोभनम्, राज्ञः दशरथस्य चत्वारः पुत्राः आसन् – रामः, लक्ष्मणः, भरतः शत्रुघ्नश्च। रामेण सह वनं का गतवती ?

*उमा* — महोदय ! (v) ____________________ ।

*आचार्या* — शोभनम्, सीता तु रामस्य पत्नी आसीत् । लक्ष्मणोऽपि रामेण सह वनं गतवान्।

**मञ्जूषा**

| |
|---|
| भरतस्य नाम्ना 'भारतम्' इति जातम्। |
| रामेण सह सीता वनं गतवती। |
| आर्यशब्दस्य अर्थः 'श्रेष्ठ' इति भवति। |
| अस्माकं देशस्य पूर्वं नाम आर्यावर्तः आसीत्। |
| अपरः भरतः राज्ञः दशरथस्य पुत्रः आसीत्। |

**उत्तराणि -**

(क) (i) धर्मप्रचारम्
(ii) बुद्धस्य
(iii) महिला
(iv) तस्याः
(v) मृतः
(vi) उज्जीवयितुम्
(vii) सत्यम्
(viii) जातस्य
(ix) निश्चितम्
(x) मृत्युलोकः

**अथवा**

(ख) (i) अस्माक देशस्य पूर्वं नाम आर्यावर्तः आसीत् ।
(ii) आर्यशब्दस्य अर्थः 'श्रेष्ठ' इति भवति ।
(iii) भरतस्य नाम्ना 'भारतम्' इति जातम् ।
(iv) अपरः भरतः राज्ञः दशरथस्य पुत्रः आसीत् ।
(v) रामेण सह सीता वनम् गतवती ।

| | | |
|---|---|---|
| 4.(i) | अधोलिखित-वाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत।<br>निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए।<br>Translate any **five** sentences in Sanskrit from the following sentences. *5×1=5*<br>(i) छात्र संस्कृत गीत गाते हैं।<br>The students sing a Sanskrit song.<br>(ii) जल ही जीवन है।<br>Water is life.<br>(iii) अर्णव संस्कृत पढ़ता है।<br>Arnav reads Sanskrit.<br>(iv) हम सब घूमने के लिए गाँव जाते हैं।<br>We all go to village for a tour.<br>(v) तुम सब आज विद्यालय जाओगे।<br>You all will go to school today.<br>(vi) कल विद्यालय में अवकाश था।<br>Yesterday was a holiday in school.<br>(vii) विद्यालय के चारों तरफ वृक्ष हैं।<br>There are trees all around the school. | मुख्य परीक्षा 2025 |
| | **उत्तराणि -**<br>(i) छात्राः संस्कृतगीतं/गीतानि गायन्ति ।<br>(ii) जलम् एव जीवनम् अस्ति ।<br>(iii) अर्णवः संस्कृतं पठति ।<br>(iv) वयं भ्रमणाय/भ्रमितुं/भ्रमणार्थं ग्रामं गच्छामः ।<br>(v) यूयम् अद्य विद्यालयं गमिष्यथ ।<br>(vi) ह्यः विद्यालये अवकाशः आसीत् ।<br>(vii) विद्यालयं परितः/सर्वतः वृक्षाः सन्ति । | |
| | | |

| | | |
|---|---|---|
| (ii) | अधोलिखित-वाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत।<br>निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए।<br>Translate any **five** sentences in Sanskrit from the following sentences. *5×1=5*<br>(i) मैं पिता के साथ गाँव जाता हूँ।<br>I go to the village with father.<br>(ii) मैं अयोध्या जाऊँगी।<br>I will go to Ayodhya.<br>(iii) शिष्य गुरु को प्रणाम करता है।<br>The student salutes the teacher.<br>(iv) लोग गंगा में स्नान करते हैं।<br>The people take bath in Ganga.<br>(v) सभी लोग नारी का सम्मान करते हैं।<br>All the people respect women.<br>(vi) नदी के दोनों ओर पेड़ हैं।<br>There are trees on both sides of the river.<br>(vii) शिक्षक छात्रों को पढ़ाता है।<br>The teacher teaches students.<br><br>**उत्तराणि** -<br>(i) अहं पित्रा सह ग्रामं गच्छामि ।<br>(ii) अहं अयोध्यां गमिष्यामि ।<br>(iii) शिष्यः गुरुं प्रणमति ।<br>(iv) जनाः गङ्गायां स्नानं कुर्वन्ति ।<br>(v) सर्वे जनाः नार्याः सम्मानं कुर्वन्ति ।<br>(vi) नदीम् उभयतः वृक्षाः सन्ति ।<br>(vii) शिक्षकः छात्रान् पाठयति । | पूरक परीक्षा 2025 |
| | | |

| | | |
|---|---|---|
| | **खण्डः 'ग'**<br>**अनुप्रयुक्त-व्याकरणम्** ***20 अङ्काः***<br>**Applied Grammar** | |
| 5.(i) | अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (प्रश्नषट्कम् केवलम्)<br>निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल छह प्रश्न)<br>Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*<br>(i) सत्यान्न प्रमदितव्यम्।<br>(ii) अथ कुतः उत्पन्नोऽयं दोषः।<br>(iii) योगेन + अन्ते तनुत्यजाम्।<br>(iv) त्वया यथोचितं व्यवहरिष्यति।<br>(v) स्वागतम् अतिथये।<br>(vi) तत् + अन्वये शुद्धिमति प्रसूतः।<br>(vii) कामः क्रोधः + तथा लोभः। | मुख्य परीक्षा 2025 |

**उत्तराणि -**

(i) सत्यात् + न

(ii) उत्पन्नः + अयम्

(iii) योगेनान्ते

(iv) यथा + उचितम्

(v) सु + आगतम्

(vi) तदन्वये

(vii) क्रोधस्तथा

(ii)

**खण्डः 'ग'**

**अनुप्रयुक्त-व्याकरणम्** ***20 अङ्काः***

अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (प्रश्नषट्कम् केवलम्)

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल छह प्रश्न)

Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*

(i) आर्य ! गुणाः खलु + अत्र।

(ii) कुत्र उत्पन्नोऽयं दोषः।

(iii) भवान् पक्षपातात् + एव नार्थम् अवेक्षते ।

(iv) आर्तस्य यथा + ओषधम्।

(v) दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

(vi) तदा + अहं तु जीवन्नपि मृतः भविष्यामि।

(vii) तनुवाक् + विभवः अपि सन्।

(viii) स्वाध्यायान्मा प्रमदः।

पूरक परीक्षा 2025

<table>
<tr><td></td><td>

**उत्तराणि** -

(i) खल्वत्र<br>
(ii) उत्पन्नः + अयम्<br>
(iii) पक्षपातादेव<br>
(iv) यथौषधम्<br>
(v) दौवारिकः + तु<br>
(vi) तदाहं<br>
(vii) तनुवाग्विभवः<br>
(viii) स्वाध्यायात् + मा

</td><td></td></tr>
<tr><td>6.(i)</td><td>

अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।<br>
(केवलं प्रश्नपञ्चकम्)

निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्तपद या उचित विग्रह को प्रदत्त विकल्पों से चुनकर लिखिए। (केवल पाँच प्रश्न)

Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences.<br>
(Only five questions) *5×1=5*

(i) आचार्याय प्रियं धनमाहृत्य <u>प्रजातन्तुं</u> मा व्यवच्छेत्सी:।

(A) प्रजाया: तन्तुम्<br>
(B) प्रजायां तन्तुम्<br>
(C) प्रजां तन्तुम्<br>
(D) प्रजायै तन्तुम्

(ii) येन <u>अकार्यं</u> करिष्यति।

(A) अन् कार्यम्<br>
(B) मा कार्यम्<br>
(C) न कार्यम्<br>
(D) आदि कार्यम्

</td><td>मुख्य परीक्षा 2025</td></tr>
</table>

(iii) वार्द्धके मुनीनां वृत्तिः येषां तेषाम्।

(A) मुनये-वृत्तीनाम्

(B) मुनिवृत्तीनाम्

(C) मुनीवृत्तीनाम्

(D) मुनिवृत्तयः

(iv) त्वया यथोचितं व्यवहरिष्यति।

(A) यथा उचितम्

(B) यथा अनुचितम्

(C) उचितं यथा

(D) उचितम् अनतिक्रम्य

(v) कोकिलानां मधुराणि वचांसि श्रुत्वा सर्वे प्रसन्नाः भवन्ति।

(A) मधुरवचः

(B) मधुवचः

(C) मधुरवचांसि

(D) मधुरवचसाम्

(vi) धर्मार्थकामाः जीवने साधनीयाः।

(A) धर्मः च अर्थः च कामः च

(B) धर्मम् अर्थम् कामम्

(C) धर्मेण अर्थकामौ

(D) कामम् च अर्थम् च धर्मः च

(vii) लब्धमिमं प्राप्स्ये मनोरथम्।

(A) मनसः रथम्

(B) मनः रथम्

(C) मनसि रथम्

(D) मनसे रथम्

| | | |
|---|---|---|
| | **<u>उत्तराणि -</u>**<br>(i) (A) प्रजाया: तन्तुम्<br>(ii) (C) न कार्यम्<br>(iii) (B) मुनिवृत्तीनाम्<br>(iv) (D) उचितम् अनतिक्रम्य<br>(v) (C) मधुरवचांसि<br>(vi) (A) धर्म: च अर्थ: च काम: च<br>(vii) (A) मनस: रथम् | |
| (ii) | अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नपञ्चकम्)<br>निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्तपद या उचित विग्रह को प्रदत्त विकल्पों से चुनकर लिखिए। (केवल पाँच प्रश्न)<br>Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences. (Only five questions) 5×1=5<br>(i) एषा <u>वेदोपनिषत्</u>।<br>(A) वेदानाम् उपनिषत्<br>(B) वेदेषु उपनिषत्<br>(C) वेदाय उपनिषत्<br>(D) वेदम् उपनिषत्<br>(ii) लक्ष्मण: <u>यथाशक्ति</u> प्रतिरोधं करोति।<br>(A) शक्तिं यथा<br>(B) शक्तिम् अनतिक्रम्य<br>(C) शक्तिम् अतिक्रम्य<br>(D) शक्तिं क्रम्य | पूरक परीक्षा 2025 |

(iii) कथं संन्यासिनोऽपि कठोरभाषणै: तिरस्करोषि ?

(A) कठोराणां भाषणै:

(B) कठोरे भाषणै:

(C) कठोरै: भाषणै:

(D) भाषणानां कठोर:

(iv) आत्मन: वधस्य योजनां ज्ञात्वा भोज: कथितवान्।

(A) वधात्योजनाम्

(B) वधस्ययोजनाम्

(C) योजनानाम्वध:

(D) वधयोजनाम्

(v) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत:।

(A) पति: च पत्नी च

(B) पती च पत्नी च

(C) पति: पत्न्यौ च

(D) पतिपत्नी च

(vi) मुञ्ज: भविष्यवाणीं श्रुत्वा विच्छायवदनो जात: ।

(A) विच्छायम् वदनम्

(B) विच्छायाया: वदनम्

(C) विच्छायं वदनं यस्य स:

(D) विच्छाय: इव वदन: यस्य

(vii) परमात्मा अनश्नन् एव अभिचाकशीति ।

(A) न अश्नन्

(B) अनश् नन्

(C) अन् अश्नन्

(D) न अनश्नन्

**उत्तराणि -**

(i) (क) वेदानाम् उपनिषत्

(ii) (ख) शक्तिम् अनतिक्रम्य

(iii) (ग) कठोरैः भाषणैः

(iv) (घ) वधयोजनाम्

(v) (क) पतिः च पत्नी च

(vi) (ग) विच्छायं वदनं यस्य सः

(vii) (क) न अश्नन् ।

| | | |
|---|---|---|
| 7.(i) | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत। (केवलं प्रश्नषट्कम्)<br>निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए गए विकल्पों में से चुनिए। (केवल छह प्रश्न)<br>From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences.<br>(Only six questions) *6×1=6*<br><br>(i) एवम् उपासितव्यम्।<br>(A) उप + अस् + ल्यप्<br>(B) उप + आस् + तव्यत्<br>(C) उप + अस् + क्त<br>(D) उप + आस् + अनीयर्<br><br>(ii) भवदभिषेको नि + वृत् + क्त।<br>(A) निवृत्तवान् (B) निवृत्य<br>(C) निवृत्त: (D) निवार्य<br><br>(iii) अङ्गुलीव उरगक्षता।<br>(A) उरगक्षत + क्त (B) उरगक्षत + टाप्<br>(C) उरगक्षत + तव्यत् (D) उरगक्षत + क्तवतु<br><br>(iv) शठ: सहस्रैरपि शिक्ष्यमाण:।<br>(A) शिक्ष् + मतुप् (B) शिक्ष् + शतृ<br>(C) शिक्ष्य् + तव्यत् (D) शिक्ष् + शानच्<br><br>(v) राजाज्ञा पालनीया।<br>(A) पाल् + अनीयर्<br>(B) पल् + अनीयर्<br>(C) पाल् + नीया<br>(D) पाल् + तव्यत्<br><br>(vi) सिद्धोऽहं बलवान् सुखी।<br>(A) बल + शानच्<br>(B) बल + क्तवतु<br>(C) बल + मतुप्<br>(D) बल + इन्<br><br>(vii) नास्ति मत्कृते आवश्यकता अवलम्बनस्य।<br>(A) आवश्यक + क्तवतु<br>(B) आवश्यक + तल्<br>(C) आवश्यक + तव्यत्<br>(D) आवश्यक + टाप् | मुख्य परीक्षा 2025 |

**उत्तराणि -**

| | | |
|---|---|---|
| (i) | (B) | उप + आस् + तव्यत् |
| (ii) | (C) | निवृत्त: |
| (iii) | (B) | उरगक्षत + टाप् |
| (iv) | (D) | शिक्ष् + शानच् |
| (v) | (A) | पाल् + अनीयर् |
| (vi) | (C) | बल + मतुप् |
| (vii) | (B) | आवश्यक + तल् |

| | | |
|---|---|---|
| (ii) | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्य: चिनुत। (केवलं प्रश्नषट्कम्)<br>निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए गए विकल्पों में से चुनिए। (केवल छह प्रश्न)<br>From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences.<br>(Only six questions) $6\times1=6$<br><br>(i) दैवी संपद् विमोक्षाय भवति।<br>(A) देव + ङीप् (B) दैव + इन्<br>(C) दैव + ङीप् (D) देव + ई<br><br>(ii) श्लाघनीये काले अत्रभवतीं वारयितुं नोत्सहे।<br>(A) श्लाघ + ल्यप् (B) श्लाघ् + अनीयर्<br>(C) श्लाघ् + तुमुन् (D) श्लाघ् + तव्यत्<br><br>(iii) शुद्धि + मतुप् तदन्वये दिलीप: प्रसूत:।<br>(A) शुद्धिमत् (B) शुद्धिमति:<br>(C) शुद्धिवत् (D) शुद्धिमति<br><br>(iv) ततो यान्ति अधमां गतिम्।<br>(A) गम् + तव्यत् (B) गम् + त्व<br>(C) गम् + क्तिन् (D) गत् + त्वम्<br><br>(v) कुपात्रेषु दीयमानं धनं क्षयमेति।<br>(A) दा + शानच् (B) दी + शानच्<br>(C) दा + शतृ (D) दा + मतुप्<br><br>(vi) भोजराजो मया रक्ष् + क्त एव अस्ति।<br>(A) रक्षक्त: (B) रक्षिक्त:<br>(C) रक्षित: (D) रक्षितवान्<br><br>(vii) बली बलं वेत्ति न वेत्ति निर्बल:।<br>(A) बल + इन्<br>(B) बलि + इन्<br>(C) बल + ङीप्<br>(D) बल + क्तिन् | पूरक परीक्षा 2025 |

**उत्तराणि -**

(i) (ग) दैव + ङीप्
(ii) (ख) श्लाघ् + अनीयर
(iii) (घ) शुद्धिमति
(iv) (ग) गम् + क्तिन्
(v) (क) दा + शानच्
(vi) (ग) रक्षितः
(vii) (क) बल + इन्

8.(i)

समुचितम् उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नत्रयम्)
उपयुक्त उपपद विभक्ति रूप को चुनिए। (केवल तीन प्रश्न)
Choose the appropriate subordinate clause form. (Only three questions) $3 \times 1 = 3$

(i) नूनं वसुमती _______ समं यास्यति।
(A) तुभ्यम्
(B) त्वया
(C) त्वम्
(D) त्वाम्

(ii) हा धिक् ________ !
(A) वयम्
(B) अस्माभि:
(C) अस्मान्
(D) अस्माकम्

(iii) ________ न प्रमदितव्यम्।
(A) कुशलम्
(B) कुशलेन
(C) कुशलात्
(D) कुशलस्य

(iv) अहम् अधुनैव ________ पारदभस्म ददामि।
(A) त्वाम्
(B) तुभ्यम्
(C) तव
(D) त्वया

मुख्य परीक्षा 2025

**उत्तराणि -**

(i) (B) त्वया
(ii) (C) अस्मान्
(iii) (C) कुशलात्
(iv) (B) तुभ्यम्

| | | |
|---|---|---|
| (ii) | समुचितम् उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नत्रयम्)<br>उपयुक्त उपपद विभक्ति रूप को चुनिए। (केवल तीन प्रश्न)<br>Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*<br><br>(i) ________ न प्रमदितव्यम्।<br>(A) धर्मात् (B) धर्मम्<br>(C) धर्मेण (D) धर्मे<br><br>(ii) ________ सह सीता वनं गन्तुम् इच्छति।<br>(A) रामाय<br>(B) रामात्<br>(C) रामम्<br>(D) रामेण<br><br>(iii) राजा कथं ________ उपगत: ?<br>(A) मोह:<br>(B) मोहम्<br>(C) मोहेन<br>(D) मोहाय<br><br>(iv) अहम् ________ प्रशिक्षणं प्रदास्यामि।<br>(A) शिशून्<br>(B) शिशो:<br>(C) शिशुभ्य:<br>(D) शिशौ | पूरक परीक्षा 2025 |
| | **उत्तराणि** -<br><br>(i) (क) धर्मात्<br>(ii) (घ) रामेण<br>(iii) (ख) मोहम्<br>(iv) (ग) शिशुभ्यः | |

| 9.(i) | खण्ड: 'घ' | मुख्य परीक्षा 2025 |
|---|---|---|

## खण्ड: 'घ'

### (i) पठितांशावबोधनम् — 25 अङ्का:

### Reading Comprehension

अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following prose passage and answer the questions based on them in Sanskrit. 5

पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजा: पर्यपालयत्। तस्य वार्धक्ये 'भोज' इति पुत्र: समजनि। स: यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यान् आहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास – यद्यहं राज्यलक्ष्मी-भारधारण-समर्थं सहोदरम् अपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवाद:। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद् विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानि: वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) कस्मिन् राज्ये सिन्धुल-संज्ञ: राजा प्रजा: पर्यपालयत् ?

(ii) राज्ञ: कदा 'भोज' इति पुत्र: समजनि ?

(iii) राज्ञ: सिन्धुलस्य अनुज: क: आसीत् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) पिता आत्मन: जरां ज्ञात्वा पुत्रं च बालं संवीक्ष्य किं विचारयामास ?

(ii) पुत्रहानि: वंशोच्छेदश्च इति विचार्य राज्ञा किं कृतम् ?

(iii) राजा बालपुत्राय राज्यप्रदाने किमनर्थं चिन्तयति ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'राजा' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'अधुना' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(iii) राजा मुञ्जम् महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास। अत्र वाक्ये 'मुञ्जम्' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

**<u>उत्तराणि -</u>**

(अ)

(i) धाराराज्ये

(ii) वार्धक्ये

(iii) मुञ्ज:

(आ)

(i) पिता आत्मन जरां ज्ञात्वा पुत्रं च :बालं संवीक्ष्य विचारयामास – यदि अहं राज्यलक्ष्मी-भारधारण-समर्थं सहोदरम् अपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवाद: ।

(ii) पुत्रहानिर्वंशोच्छेद :श्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच ।

(iii) राजा चिन्तयति यत् मुञ्जो बालं मे पुत्रं राज्यलोभाद् विषादिना मारयिष्यति ।

(इ)

(i) पर्यपालयत्

(ii) पुरा

(iii) महाबलम्

---

(ii)

**खण्ड: 'घ'**

**(i) पठितांशावबोधनम्**

**Reading Comprehension** — *25 अङ्का:*

अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following prose passage and answer the questions based on them in Sanskrit. *5*

शोकसन्तप्तो मुञ्ज: प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान्। राज्ञ: वह्निप्रवेश-कार्यक्रमं श्रुत्वा वत्सराज: बुद्धिसागरं नत्वा शनै: शनै: प्राह-तात ! मया भोजराजो रक्षित एवास्ति । पुन: बुद्धिसागरेण तस्य कर्णे किमपि कथितम्, यन्निशम्य वत्सराज: ततो निष्क्रान्त: । पुन: राज्ञो वह्निप्रवेशकाले कश्चन कापालिक: सभां समागत: । सभामागतं कापालिकं दण्डवत् प्रणम्य मुञ्ज: प्रावोचत् – हे योगीन्द्र ! महापापिना मया हतस्य पुत्रस्य प्राणदानेन मां रक्षेति । अत: कापालिक: तं प्रावोचत् – राजन् ! मा भैषी: । शिवप्रसादेन स: जीवितो भविष्यति । तदा श्मशान-भूमौ कापालिकस्य योजनानुसारं भोज: तत्र समानीत: 'योगिना भोजो जीवित:' इति कथा लोकेषु प्रसृता । पुन: गजेन्द्रारूढो भोजो राजभवनम् अगात् । सन्तुष्टो राजा मुञ्ज: भोजं निजसिंहासने निवेश्य निजपट्टराज्ञीभिश्च सह तपोवनभूमिं गत्वा परं तपस्तेपे । भोजश्चापि चिरं प्रजा: पालितवान्।

**प्रश्ना:**

पूरक परीक्षा 2025

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) वत्सराज: कं नत्वा शनै: शनै: प्राह ?

(ii) कश्चन कापालिक: कुत्र समागत: ?

(iii) गजेन्द्रारूढ: क: राजभवनम् अगात् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) मुञ्ज: किं कर्तुं वह्नौ प्रवेशनं निश्चितवान् ?

(ii) कदा कश्चन कापालिक: सभां समागत: ?

(iii) लोकेषु का कथा प्रसृता ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'शोकसन्तप्तो मुञ्ज:' अनयो: पदयो विशेषणपदं किम् अस्ति ?

(ii) 'अगात्' अस्य क्रियापदस्य कर्तृपदं किम् ?

(iii) 'अग्नौ' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**उत्तराणि** -

(अ) (i) बुद्धिसागरम्

(ii) सभाम्

(iii) भोजः

(आ) (i) शोकसन्तप्तो मुञ्जः प्रायश्चित्तं कर्तुम् आत्मनो वह्नौ प्रवेशनं निश्चितवान् ।

(ii) राज्ञः वह्निप्रवेशकाले कश्चन कापालिकः सभां समागतः

(iii) 'योगिना' भोजो जीवितः इति कथा लोकेषु प्रसृता ।

(इ) (i) शोकसन्तप्तः

(ii) भोजः

(iii) वह्नौ

| | | |
|---|---|---|
| 10.(i) | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।<br>निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।<br>Read the following poetry and answer the questions based on them in Sanskrit. 5<br><br>कर्णामृतं सूक्तिरसं विमुच्य,<br>दोषेषु यत्न: सुमहान् खलानाम् ।<br>निरीक्षते केलिवनं प्रविश्य,<br>क्रमेलक: कण्टकजालमेव ॥<br><br>**प्रश्ना:**<br><br>(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)<br>एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$<br>(i) केषां यत्न: दोषेषु भवति ?<br>(ii) सूक्तिरसं कीदृशं भवति ?<br>(iii) क: कण्टकजालं निरीक्षते ?<br><br>(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)<br>पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer in a complete sentence : (Only two questions) $2\times1=2$<br>(i) किं विमुच्य खलानां यत्न: दोषेषु एव भवति ?<br>(ii) क्रमेलक: कुत्र प्रविशति ?<br>(iii) क्रमेलक: केलिवने किं निरीक्षते ?<br><br>(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)<br>निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer as directed : (Only two questions) $2\times1=2$<br>(i) 'यत्न:' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?<br>(ii) 'दुष्टानाम्' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?<br>(iii) 'गुणेषु' इति पदस्य कृते विलोमपदं किं प्रयुक्तम् ? | मुख्य परीक्षा 2025 |

| | | |
|---|---|---|
| | **उत्तराणि -**<br>(अ)<br>(i) खलानाम्<br>(ii) कर्णामृतं<br>(iii) क्रमेलक:<br>(आ)<br>(i) कर्णामृतं सूक्तिरसं विमुच्य खलानां यत्न: दोषेषु एव भवति ।<br>(ii) क्रमेलक: केलिवनं प्रविशति ।<br>(iii) क्रमेलक: केलिवने कण्टकजालमेव निरीक्षते ।<br>(इ)<br>(i) सुमहान्<br>(ii) खलानाम्<br>(iii) दोषेषु | |
| (ii) | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।<br>निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।<br>Read the following poetry and answer the questions based on them in Sanskrit. *5*<br>दीर्घप्रयासेन कृतं हि वस्तु,<br>निमेषमात्रेण भजेद् विनाशम्।<br>कर्तुं कुलालस्य तु वर्षमेकं,<br>भेत्तुं हि दण्डस्य मुहूर्तमात्रम्॥<br>**प्रश्ना:** | पूरक परीक्षा 2025 |

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) वस्तु केन कृतं भवति ?

(ii) निमेषमात्रेण किं विनाशं भजेत् ?

(iii) कस्य कर्तुं वर्षमेकं भवति ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) दीर्घप्रयासेन कृतं वस्तु कियत्कालेन विनाशं भजेत् ?

(ii) कुलालस्य वस्तु कर्तुं कियत्कालं भवेत् ?

(iii) दण्डस्य कियत्कालं भेत्तुम् अलम् ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'वर्षम्' इत्यस्य विशेषणपदं किं प्रयुक्तम् ?

(ii) 'कुम्भकारस्य' पर्यायपदं किम् ?

(iii) 'वस्तु' इति कर्तृपदस्य क्रियापदं किम् ?

**उत्तराणि -**

(अ) (i) दीर्घप्रयासेन

(ii) वस्तु

(iii) कुलालस्य

(आ) (i) दीर्घप्रयासेन कृतं वस्तु निमेषमात्रेण विनाशं भजेत् ।

(ii) कुलालस्य वस्तु कर्तुं वर्षमेकं भवेत् ।

(iii) दण्डस्य मुहूर्तमात्रं भेत्तुम् अलम् ।

(इ) (i) एकम्

(ii) कुलालस्य

(iii) भजेत्

11.(i) अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*मुख्य परीक्षा 2025*

*कुण्डला* — परस्परप्रीतिमतो: भवतो: उपदेशस्य नास्ति कोऽपि अवकाश: तदापि सखीस्नेह: मां भाषयति – भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थ-काम-संसिद्धये यथा भार्या भर्तु: सहायिनी भवति तथा न कोऽपि अन्य:। परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत:। पति: यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति – तत्खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति।

*ऋतध्वज:* — लक्ष्म्या: रक्षार्थं पत्न्या: सहयोग: अनिवार्य:।

*मदालसा* — कुण्डले! लक्ष्मीपूजायां न मे प्रवृत्ति:। यदि लक्ष्मी: पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कार:।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) तदापि क: मां भाषयति ?

(ii) भर्त्रा सदैव का भर्तव्या रक्षितव्या च ?

(iii) मदालसाया: कस्यां न प्रवृत्ति: ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) त्रिवर्गं कौ साधयत: ?

(ii) कस्मै भार्या भर्तु: सहायिनी भवति ?

(iii) पति: यदि स्वार्जितं प्रभूतं धनं गृहमानयति तत् पत्न्यभावे तद्धनं कां गतिं भजते ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'साधयत:' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'निवृत्ति:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(iii) 'सहायिनी' शब्दस्य विशेष्यपदं किं प्रयुक्तम् ?

**उत्तराणि -**

(अ)

(i) सखीस्नेह:

(ii) भार्या

(iii) लक्ष्मीपूजायाम्

(आ)

(i) परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत: ।

(ii) धर्मार्थ-काम-संसिद्धये भार्या भर्तु: सहायिनी भवति ।

(iii) गृहे पत्न्यभावे तद्धनं कुपात्रेषु दीयमानं क्षयम् एति ।

(इ)

(i) पतिपत्न्यौ

(ii) प्रवृत्ति:

(iii) भार्या

(ii) अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत। | पूरक परीक्षा 2025

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*ऋतध्वज:* — अहो शोभनं गन्धर्वराजविश्वावसो: राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति? वामपार्श्वे रमणीनाम् आलाप-इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

*कुण्डला* — सखि ! मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

*मदालसा* — ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

*कुण्डला* — विनयशीले ! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरु-तुम्बुरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

*मदालसा* — किं श्रुतं त्वया यद् गुरुवर्यै: माम् अधिकृत्य पित्रे कथितम्?

*कुण्डला* — अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वर: न प्राप्त:। अत: तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) गन्धर्वराजविश्वावसो: राजोद्यानं कीदृशम्?

(ii) वामपार्श्वे कासाम् आलाप: इव श्रूयते?

(iii) विद्या किं ददाति?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) किं श्रुत्वा कस्य यूनो हृदयं उत्कण्ठितं न भविष्यति?

(ii) ज्ञानोदधि: कीदृश:?

(iii) सम्प्रति राजकुमारी मदालसा कीदृशी जाता?

| | | |
|---|---|---|
| | (इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)<br>निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)<br>Answer as directed : (Only two questions) 2×1=2<br>(i) 'पिकानाम्' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?<br>(ii) 'ज्ञानोदधि: अनन्तपार:' इति पदयो: विशेष्यपदं किम् ?<br>(iii) 'ददाति' इति क्रियापदस्य कर्तृपदं किम् ?<br><br>**उत्तराणि** -<br><br>(अ) (i) शोभनम्<br>(ii) रमणीनाम्<br>(iii) विनयम्<br>(आ) (i) कोकिलानां मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ।<br>(ii) ज्ञानोदधिः तु अनन्तपारो गभीरश्च ।<br>(iii) सम्प्रति राजकुमारी मदालसा सर्व विद्यानिष्णाता जाता ।<br>(इ) (i) कोकिलानाम्<br>(ii) ज्ञानोदधिः<br>(iii) विद्या । | |
| 12.(i) | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दै: पूरयित्वा पुन: लिखत।<br>निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुन: लिखिए।<br>Rewrite the gist of the following verse by filling it with the help of the words given in the box. 3×1=3<br><br>प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।<br>स पिता पितरस्तासां, केवलं जन्महेतव: ॥<br><br>**भावार्थ:**<br><br>राजा दिलीप: प्रजानां विनम्रताशिक्षणात् (i) __________ भरणात् अपि (ii) __________ आसीत्। तासां पितर: तु केवलं (iii) ___________ आसन्।<br><br>**मञ्जूषा**<br><br>पिता, जन्महेतव:, रक्षणात्।<br><br>**अथवा (OR)** | मुख्य परीक्षा 2025 |

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।

Write the correct essence from three essences of the following each part. *3×1=3*

(अ) वेदमनूच्य आचार्य: अन्तेवासिनम् अनुशास्ति।

(i) आचार्य: वेदं पाठयति।

(ii) शिष्य: वेदं पठति।

(iii) आचार्य: वेदं पाठयित्वा शिष्यम् उपदिशति।

(आ) अपूर्व: खल्वस्यायास:।

(i) अस्य आयास: प्रशंसनीय:।

(ii) अस्य प्रयास: विफल:।

(iii) अस्य (लक्ष्मणस्य) प्रयास: निश्चितरूपेण अद्वितीय:।

(इ) 'मया दृढं परीक्षितोऽसि।'

(i) अहं तव कठिनपरीक्षां कृतवान्।

(ii) मया त्वं परीक्ष्यसे।

(iii) त्वं मया सम्यक् दृष्ट: असि।

**उत्तराणि -**

(क)

(i) रक्षणात्

(ii) पिता

(iii) जन्महेतव:

(ख)

(अ) (iii) आचार्यः वेदं पाठयित्वा शिष्यम् उपदिशति ।

(आ) (iii) अस्य (लक्ष्मणस्य) प्रयास: निश्चितरूपेण अद्वितीय: ।

(इ) (i) अहं तव कठिनपरीक्षां कृतवान् ।

(ii)

अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।

निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुनः लिखिए।

Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

पूरक परीक्षा 2025

त्रैलोक्यं दग्धुकामेव ललाटपुट-संस्थिता।
भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता॥

**भावार्थः**

सौमित्रस्य (i) __________ स्थिता भृकुटिः लोकत्रयं दग्धुम् (ii) __________ नियतिः इव (iii) ___________ अस्ति।

**मञ्जूषा**

| |
|---|
| इच्छन्ती, ललाटमध्ये, व्यवस्थिता |

**अथवा (OR)**

प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।

Write the correct essence from three essences of the following each part. *3×1=3*

(अ) "इदमस्तीदमपि मे भविष्यति पुनर्धनम्।"
- (i) मम पार्श्वे एतन्मात्रं धनमस्ति पुनः अत्यधिकमपि धनं प्राप्स्यामि।
- (ii) इदं वस्तु मम वर्तते अन्यमपि मे स्यात्।
- (iii) इदमस्ति इदं चिन्तयित्वा कोऽपि सन्तुष्टः न।

(आ) "युधिष्ठिरस्य एषा एव चिन्तनसरणिः।"
- (i) ज्येष्ठपाण्डुपुत्रस्य द्यूतविषये ईदृशी एव विचारधारा आसीत्।
- (ii) तस्य ईदृशी प्रवृत्तिः चिन्तनीया आसीत्।
- (iii) युधिष्ठिरस्य कुलपरम्परा ईदृशी एव।

(इ) "नैकेनापि समं गता वसुमति।"
- (i) सामान्यजनेन सार्धं वसुमती नैव गच्छति।
- (ii) एकेन सह वसुमती गता।
- (iii) मृत्योः अनन्तरं न केनापि सह इयं वसुमती गताऽस्ति।

| | | |
|---|---|---|
| | **उत्तराणि -**<br><br>(क) (i) ललाटमध्ये<br>(ii) इच्छन्ती<br>(iii) व्यवस्थिता<br>अथवा<br>(अ) (i) मम पार्श्वे एतन्मात्रं धनमस्ति पुनः अत्यधिकमपि धनं प्राप्स्यामि ।<br>(आ) (i) ज्येष्ठपाण्डु पुत्रस्य द्यूतविषये ईदृशी एव विचारधारा आसीत्<br>(इ) (iii) मृत्योः अनन्तरं न केनापि सह इयं वसुमती गतास्ति । | |
| 13.(i) | अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत ।<br>निम्नलिखित श्लोक के दिए गए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए ।<br>The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*<br><br>दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च ।<br>अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥<br><br>**अन्वय:**<br>हे पार्थ ! दम्भ: (i) ___________ अभिमान: च क्रोध: पारुष्यम् एव च अज्ञानं च (ii) ___________ संपदम् (iii) ___________ (लक्षणमस्ति) ।<br><br>**मञ्जूषा**<br>आसुरीम्, दर्प:, अभिजातस्य । | मुख्य परीक्षा 2025 |
| | **उत्तराणि -**<br>(i) दर्प:<br>(ii) आसुरीम्<br>(iii) अभिजातस्य | |
| | | |

| | | |
|---|---|---|
| (ii) | अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत।<br>निम्नलिखित श्लोक के दिए गए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए।<br>The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*<br><br>प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा:।<br>न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते॥<br><br>**अन्वय:**<br><br>आसुरा: जना: (i) ___________ च निवृत्तिम् च न विदु: तेषु न (ii) ___________ न अपि च आचार: न (iii) __________ विद्यते।<br><br>**मञ्जूषा**<br>शौचम्, प्रवृत्तिम्, सत्यम्। | पूरक परीक्षा 2025 |
| | **उत्तराणि** -<br>(i) प्रवृत्तिम्<br>(ii) शौचम्<br>(iii) सत्यम् । | |
| 14.(i) | 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत।<br>'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए।<br>Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$<br><br>*'क' स्तम्भ:* — *'ख' स्तम्भ:*<br>i. भरतो वा भवेद् राजा — 1. भवादृशानां प्रवेशसमयो भवति।<br>ii. आचार्याय प्रियं धनमाहृत्य — 2. वयं वा ननु तत्समम्।<br>iii. महाराजस्य सन्ध्योपासनसमये — 3. भोज: किमपि वत्सराजं कथितवान्।<br>iv. आत्मनो वधयोजनां ज्ञात्वा — 4. प्रजातन्तुं मा व्यवच्छेत्सी:। | मुख्य परीक्षा 2025 |

| | | |
|---|---|---|
| | **उत्तराणि -**<br>i. भरतो वा भवेद् राजा — 2. वयं वा ननु तत्समम् ।<br>ii. आचार्याय प्रियं धनमाहृत्य — 4. प्रजातन्तुं मा व्यवच्छेत्सी: ।<br>iii. महाराजस्य सन्ध्योपासनसमये — 1. भवादृशानां प्रवेशसमयो भवति ।<br>iv. आत्मनो वधयोजनां ज्ञात्वा — 3. भोज: किमपि वत्सराजं कथितवान् । | |
| (ii) | 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत।<br>'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए।<br>Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$<br>*'क' स्तम्भ:* — *'ख' स्तम्भ:*<br>i. भरतो वा भवेद् राजा — 1. विभूषणं मौनमपण्डितानाम्।<br>ii. शैशवेऽभ्यस्तविद्यानां — 2. वयं वा ननु तत्समम्।<br>iii. विशेषत: सर्वविदां समाजे — 3. मिमं प्राप्स्ये मनोरथम्<br>iv. इदमद्य मया लब्ध- — 4. यौवने विषयैषिणाम्। | पूरक परीक्षा 2025 |
| | **उत्तराणि -**<br>(i) भरतो वा भवेद् राजा (ब) वयं वा ननु तत्समम् ।<br>(ii) शैशवेऽभ्यस्तविद्यानां (द) यौवने विषयैषिणाम् ।<br>(iii) विशेषतः सर्वविदां समाजे (अ) विभूषणं मौनमपण्डितानाम्<br>(iv) इदमद्य मया लब्ध (स) मिमं प्राप्स्ये मनोरथम् । | |

| | | |
|---|---|---|
| 15(i) | अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत।<br>निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।<br>Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. $4\times\frac{1}{2}=2$<br><br>(i) प्रसक्ताः कामभोगेषु पतन्ति नरके-<u>अशुचौ</u>।<br>(ii) नैकेनापि समं गता <u>वसुमती</u>।<br>(iii) सर्वस्य <u>लोचनं</u> शास्त्रम्।<br>(iv) त्वादृशा एव वस्तुतः पुरस्कार<u>भाजनानि</u> भवन्ति।<br><br>**मञ्जूषा**<br>पृथ्वी, अपवित्रे, पात्राणि, नेत्रम्। | मुख्य परीक्षा 2025 |
| | **<u>उत्तराणि -</u>**<br><br>(i) अपवित्रे<br>(ii) पृथ्वी<br>(iii) नेत्रम्<br>(iv) पात्राणि | |
| (ii) | अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषातः चित्वा लिखत।<br>निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।<br>Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. $4\times\frac{1}{2}=2$<br>(i) प्रजानामेव <u>भूत्यर्थं</u> स ताभ्यो बलिमग्रहीत्।<br>(ii) आः <u>अपण्डितः</u> खलु भवान्।<br>(iii) त्वादृशा एव वस्तुतः पुरस्कार-<u>भाजनानि</u> भवन्ति।<br>(iv) असौ मया <u>हतः</u> शत्रुः।<br><br>**मञ्जूषा**<br>मूर्खः, कल्याणाय, मारितः, पात्राणि। | पूरक परीक्षा 2025 |

**उत्तराणि -**

(i) कल्याणाय
(ii) मूर्खः
(iii) पात्राणि
(iv) मारितः

16(i)

**खण्ड: 'घ'**

**(ii) संस्कृतसाहित्यस्य सामान्यपरिचय:** ***10 अङ्का:***

**General Introduction to Sanskrit Literature**

अधोलिखित-प्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)
Answer the following questions. (Only three questions) *3×1=3*

(i) 'मातुराज्ञा गरीयसी' इति पाठ: कस्मात् पुस्तकात् संगृहीत: ?

(ii) 'शिवराजविजयम्' इति ग्रन्थस्य रचनाकार: क: ?

(iii) 'प्रजानुरञ्जको नृप:' अस्य पाठस्य लेखक: क: ?

(iv) 'मदालसा' पाठस्य लेखिका का ?

मुख्य परीक्षा 2025

**उत्तराणि -**

(i) 'मातुराज्ञा गरीयसी' इति पाठ: प्रतिमानाटकात् संगृहीत: ।
(ii) अम्बिकादत्तव्यास:
(iii) महाकविः कालिदास:
(iv) आचार्या वेदकुमारी घई

| | | |
|---|---|---|
| (ii) | **खण्ड: 'घ'**<br><br>**(ii) संस्कृतसाहित्यस्य सामान्यपरिचय:** ***10 अङ्का:***<br><br>**General Introduction to Sanskrit Literature**<br><br>अधोलिखित-प्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)<br>Answer the following questions. (Only three questions) *3×1=3*<br>(i) 'मातुराज्ञा गरीयसी' इति पाठस्य सन्दर्भग्रन्थ: क: ?<br>(ii) 'प्रजानुरञ्जको नृप:' इति पाठस्य लेखक: क: ?<br>(iii) 'दौवारिकस्य निष्ठा' अस्य पाठस्य सन्दर्भग्रन्थ: क: ?<br>(iv) 'मदालसा' इति नाटकस्य लेखिका का ? | पूरक परीक्षा 2025 |
| | **उत्तराणि** -<br><br>(i) प्रतिमानाटकम्<br>(ii) कालिदासः<br>(iii) शिवराजविजयम्<br>(iv) वेद कुमारी घई | |

| | | |
|---|---|---|
| 17.(i) | मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)<br>Fill in the blanks with the help of the words given in the box.<br>(Only three questions) $3\times1=3$<br>(i) शिशुपालवध-महाकाव्यम् _______ रचना अस्ति।<br>(ii) दण्डिन: काव्येषु _______ प्रसिद्धमस्ति।<br>(iii) गद्यपद्यमयं काव्यम् _______ कथ्यते।<br>(iv) उपमाप्रसिद्ध: _______ अस्ति।<br>**मञ्जूषा**<br>कालिदास:, चम्पू:, माघस्य, पदलालित्यम्। | मुख्य परीक्षा 2025 |
| | **उत्तराणि -**<br>(i) माघस्य<br>(ii) पदलालित्यम्<br>(iii) चम्पू:<br>(iv) कालिदास: | |
| (ii) | मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)<br>Fill in the blanks with the help of the words given in the box.<br>(Only three questions) $3\times1=3$<br>(i) गद्यकाव्ये 'हर्षचरितम्' __________ अस्ति।<br>(ii) __________ कवीनां निकषं वदन्ति।<br>(iii) सर्गबन्धो __________ कथ्यते।<br>(iv) गद्यपद्यमयं __________ कथ्यते।<br>**मञ्जूषा**<br>महाकाव्यम्, चम्पूकाव्यम्, गद्यम्, आख्यायिका। | पूरक परीक्षा 2025 |
| | **उत्तराणि -**<br>(i) आख्यायिका<br>(ii) गद्यम्<br>(iii) महाकाव्यम्<br>(iv) चम्पूकाव्यम् | |

| | | |
|---|---|---|
| 18.<br>(i) | समुचितं मेलयत :<br>समुचित मिलान कीजिए :<br>Match properly : *4×1=4*<br>i. नाट्यशास्त्रम् — 1. बाणभट्ट:<br>ii. नाटकस्य अन्ते — 2. कालिदास:<br>iii. कादम्बरी — 3. भरतवाक्यम्<br>iv. अभिज्ञानशाकुन्तलम् — 4. भरतमुनि: | मुख्य परीक्षा 2025 |
| | **<u>उत्तराणि -</u>**<br>i. नाट्यशास्त्रम् — 4. भरतमुनि:<br>ii. नाटकस्य अन्ते — 3. भरतवाक्यम्<br>iii. कादम्बरी — 1. बाणभट्ट:<br>iv. अभिज्ञानशाकुन्तलम् — 2. कालिदास: | |
| (ii) | समुचितं मेलयत :<br>समुचित मिलान कीजिए :<br>Match properly : *4×1=4*<br>*भाग: 'क'* — *भाग: 'ख'*<br>i. नाटकस्य प्रारम्भे भवति — 1. नाटकम्<br>ii. स्वप्नवासवदत्तम् — 2. भवभूते: कृति:<br>iii. उत्तररामचरितम् — 3. नान्दी<br>iv. रूपकस्य भेद: — 4. भास: | पूरक परीक्षा 2025 |
| | **<u>उत्तराणि -</u>**<br>i. नाटकस्य प्रारम्भे भवति — 3. नान्दी<br>ii. स्वप्नवासवदत्तम् — 4. भास:<br>iii. उत्तररामचरितम् — 2. भवभूते: कृति:<br>iv. रूपकस्य भेद: — 1. नाटकम् | |